हेतु itself is false or non-existent; as in the argument पर्वतो वह्निमान् काञ्चनमयधूमात्.

**व्यापद्** 4 Ā. 1 To die, perish. -2 To come down to the earth), fall down. -3 To be inaudible (as a sound). -*Caus.* 1 To kill, slay. -2 To hurt, injure, spoil.

**व्यापत्तिः** *f.* 1 Ruin, calamity, misfortune; व्यापत्तिं कर्मणां दृष्ट्वा जुगुप्सन्ति जनाः सदा Mb. 12. 265. 34; औदासीन्यं न युक्तं प्रियसुहृदि गते मत्कृते चातिघोरां। व्यापत्तिम् Mu. 6. 20; Mk. 6. 1. -2 Substitution of one thing for another. -3 Death; तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः R. 12. 56.

**व्यापद्** *f.* 1 Calamity, misfortune, affliction; त्वद्-व्यापदो गणयता भयमन्वभावि तत् सर्वमेकपद एव मम प्रशान्तम् Māl. 9. 36; Bh. 3. 105. -2 Disease. -3 Derangement. -4 Death, decease.

**व्यापन्न** *p. p.* 1 Fallen into misfortune, ruined. -2 Failed, miscarried. -3 Hurt, injured. -4 Dead, expired, deceased; as in अव्यापन्न q. v. -5 Deranged, disordered. -6 Substituted, changed. -7 Spoilt, that which is unfit to be consumed by the Āryas; यदभोज्यमार्याणां केशकीटावपन्नमन्येन वोपघातेनोपहतं तद् व्यापन्नमिति ŚB. on MS. 6. 5. 48.

**व्यापादः, व्यापादनम्** 1 Killing, slaying. -2 Ruin, destruction. -3 Evil design, malice.

**व्यापादक** *a.* Destructive, murderous.

**व्यापादित** *p. p.* 1 Killed, slain, destroyed. -2 Ruined, injured, hurt.

**व्यापृ** 6 Ā. 1 To be engaged in or occupied with, be busy about (with loc.). -2 To be employed or placed (in any office). -*Caus.* 1 To cause to work, engage upon, entrust with, appoint to (usually with loc.); व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्तिः R. 2. 38; आत्मजनानुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि Mu. 1. -2 To place, set, fix, direct, cast; व्यापारयामास करं किरीटे R. 6. 19; उमामुखे...... व्यापारयामास विलोचनानि Ku. 3. 67; व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः Ve. 3. 19; R. 13. 25; M. 3. 4. -3 To use, employ; शस्त्रं मित्रशरीररक्षणकृते व्यापारणीयं मया Mu. 7. 16.

**व्यापारः** 1 Employment, engagement, business, occupation; ततः प्रविशति यथोक्तव्यापारा शकुन्तला Ś. 1; Ku. 2. 54. -2 Application, employment; वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषाम् Mu. 2. 4. -3 Profession, trade, practice, exercise; as in शस्त्रव्यापार. -4 An act, doing, performance. -5 Working, operation, action, influence; (व्रतं) व्यापाररोधि मदनस्य निषेवितव्यम् Ś. 1. 26; तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम् Ku. 7. 93; V. 3. 17. -6 Being placed on; हस्तं कम्पवती रुणद्धि रशनाव्यापारलोलाङ्गुलिम् M. 4. 15. -7 Exertion, effort; आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति Ku. 6. 32 'will be pleased to exert herself in that behalf'; न व्यापारशतेनापि शुकवत् पाठ्यते बकः H. Pr. 43. (व्यापारं कृ 1 to take part in. -2 to have effect on. -3 to meddle; as in अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति Pt. 1. 21.)

**व्यापारक** *a.* Having an occupation or function.

**व्यापारित** *p. p.* 1 Engaged, occupied, employed; appointed; अस्मिन्नहमद्रिकुक्षौ व्यापारितः R. 2. 38. -2 Placed, fixed, set.

**व्यापारिन्** *m.* 1 A dealer, trader. -2 One who exercises or practises anything.

**व्यापृत** *p. p.* 1 Engaged in, occupied or busy with, employed in (with loc.); अन्यस्मिन् कर्मणि व्यापृतं धनुः Ś. 6. 31. -2 Placed, fixed. -*m.* An employee, a minister.

**व्यापृतिः** *f.* 1 Employment, engagement, business; स्वस्वव्यापृतिमग्नमानसतया Bv. 1. 58. -2 Operation, action. -3 Exertion. -4 Profession, practice; see व्यापार.

**व्याबाधः** Disease, illness.

**व्याभाषणम्** Way or manner of speaking.

**व्याभ्युक्षी** = व्यात्युक्षी q. v.

**व्यामः, व्यामनम्** A measure of length equal to the space between the tips of the fingers of either hand when the arms are extended; a fathom; (द्रुमं) दशव्याममथोद्विद्धं निष्पत्रमकरोत्तदा Mb. 3. 11. 39; Dk. 2. 2.

**व्यामर्षः** 1 Impatience. -2 Erasure, wiping out.

**व्यामिश्र** *a.* 1 Mingled, intermixed. -2 Manifold, of various kinds. -3 Dubious, doubtful; व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे Bg. 3. 2. -4 Troubled, distracted; नैतत् पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः Mb. 14. 19. 56. -**Comp.** -**वानम्** a blanket of mixed texture; Kau. A. 2. 11.

**व्यामिश्रकम्** Various works of mixed languages as Prākritas; श्रैष्ठ्यं चास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च Rām. 2. 1. 27 (com. व्यामिश्रकेषु प्राकृतादिभाषामिश्रितनाटकादिषु श्रैष्ठ्यं निपुणताम्).

**व्यामोकः** Release, freedom (from), getting rid of.

**व्यामोहः** 1 Infatuation. -2 Bewilderment, embarrassment, perplexity; कंसस्यालमभूज्जितं जितमिति व्यामोहकोलाहलः Gīt. 10; Kāv. 3. 101.

**व्यायः** The way of stretching the bow before shooting the arrow; कैशिकः केशमूले वै शरशृङ्गे च सात्त्विकः। श्रवणे वत्सकर्णश्च ग्रीवायां भरतो भवेत्। अंसके स्कन्धनामा च व्यायाः पञ्च प्रकीर्तिताः॥ Dhanur. 92-93.

**व्यायम्** 1 P. 1 To strech out, extend. -2 To struggle, contend, fight. -3 To try, strive, endeavour. -4 To sport, dally.

**व्यायत** *p. p.* 1 Long, extended; युवा युगव्यायतबाहुरंसलः R. 3. 34. -2 Expanded, wide open. -3 Exercised,